# श्री गणपति अथर्वशीर्ष

ॐ नमस्ते गणपतये ।
त्वमेव प्रत्यक्षं तत्वमसि । त्वमेव केवलं कर्ताऽसि ।
त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि ।
त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम् ।।१ ।।

ॠतं वच्मि । सत्यं वच्मि ।। २ ।।

अव त्व मां । अव वक्तारं । अव श्रोतारं । अव दातारं ।
अव धातारं । अवानूचानमव शिष्यं । अव पश्चातात ।
अव पुरस्तात । अवोत्तरात्तात । अव दक्षिणात्तात् ।
अवचोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो माँ पाहि-पाहि समंतात् ।। ३ ।।

त्वं वाङ्मयस्त्वं चिन्मय:। त्वमानंदमसयस्त्वं ब्रह्ममय:।
त्वं सच्चिदानंदाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ।। ४ ।।

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभ: । त्वं चत्वारिकाकूपदानि ।। ५ ।।

त्वं गुणत्रयातीत: त्वमवस्थात्रयातीत: । त्वं देहत्रयातीत: ।
त्वं कालत्रयातीत: । त्वं मूलाधारस्थितोऽसि नित्यं ।
त्वं शक्तित्रयात्मक: । त्वां योगिनो ध्यायंति नित्यं ।
त्वं ब्रह्मा त्वं विष्णुस्त्वं रूद्रस्त्वं इंद्रस्त्वं अग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भुव:स्वरोम् ।। ६ ।।

गणादि पूर्वमुच्चार्य वर्णादिं तदनंतरं । अनुस्वार: परतर: । अर्धेन्दुलसितं ।
तारेण ऋद्धं । एतत्तव मनुस्वरूपं । गकार: पूर्वरूपं । अकारो मध्यमरूपं ।
अनुस्वारश्चान्त्यरूपं । बिन्दुरूत्तररूपं । नाद: संधानं ।
सँ हितासंधि: सैषा गणेश विद्या । गणकऋषि: निचृद्गायत्रीच्छंद: ।
गणपतिर्देवता । ॐ गं गणपतये नम: ।। ७ ।।

एकदंताय विद्महे । वक्रतुण्डाय धीमहि ।
तन्नो दंती प्रचोदयात ।। ८ ।।

एकदंतं चतुर्हस्तं पाशमंकुशधारिणम् । रदं च वरदं हस्तैर्विभ्राणं मूषकध्वजम् ।
रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगंधाऽनुलिप्तांगं रक्तपुष्पै: सुपुजितम् ।।
भक्तानुकंपिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्टयादौ प्रकृते पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वर: ।। ९ ।।

नमो व्रातपतये । नमो गणपतये । नम: प्रमथपतये ।
नमस्तेऽस्तु लंबोदरायैकदंताय । विघ्ननाशिने शिवसुताय ।
श्रीवरदमूर्तये नमो नम: ।। १० ।।

## फलश्रुती

एतदथर्वशीर्ष योऽधीते । स ब्रह्मभूयाय कल्पते ।
स सर्व विघ्नैर्नबाध्यते । स सर्वत: सुखमेधते ।
स पञ्चमहापापात्प्रमुच्यते ।। ११ ।।

सायमधीयानो दिवसकृतं पापं नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायंप्रात: प्रयुंजानोऽपापो भवति ।
सर्वत्राधीयानोऽपविघ्नो भवति ।
धर्मार्थकाममोक्षं च विंदति ।। १२ ।।

इदमथर्वशीर्षमशिष्याय न देयम् ।
यो यदि मोहाद्दास्यति स पापीयान् भवति ।
सहस्रावर्तनात् यं यं काममधीते तं तमनेन साधयेत् ।। १३ ।।

अनेन गणपतिमभिषिंचति स वाग्मी भवति
चतुर्थ्यामनश्र्नन जपति स विद्यावान भवति । इत्यथर्वणवाक्यं ।
ब्रह्माद्यावरणं विद्यात् न बिभेति कदाचनेति ।। १४ ।।

यो दूर्वांकुरैंर्यजति स वैश्रवणोपमो भवति ।
यो लाजैर्यजति स यशोवान भवति स मेधावान भवति ।
यो मोदकसहस्रेण यजति स वाञ्छित फलमवाप्रोति ।
य: साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ।। १५ ।।

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ।
सूर्यग्रहे महानद्यां प्रतिमासंनिधौ
वा जप्त्वा सिद्धमंत्रों भवति । महाविघ्नात्प्रमुच्यते ।
महादोषात्प्रमुच्यते । महापापात् प्रमुच्यते ।
स सर्वविद्भवति से सर्वविद्भवति ।
य एवं वेद इत्युपनिषद् ।। १७ ।।